শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকুমারৱরদার্যেণ অনুগৃহিতম্

# ॥ শ্রীদেশিকমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীদেশিকমঙ্গলম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

শ্রীমল্লক্ষ্মণযোগীন্দ্রসিদ্ধান্তৱিজযধ্ৱজম্।
ৱিশ্ৱামিত্রকুলোদ্ভূতং ৱরদার্যমহং ভজে ॥

সর্ৱতন্ত্রস্ৱতন্ত্রায সিংহায কৱিৱাদিনাম্।
ৱেদান্তাচার্যৱর্যায ৱেঙ্কটেশায মঙ্গলম্॥ **1** ॥

নভস্যমাসি শ্রোণাযাম্ অৱতীর্ণায সূরযে।
ৱিশ্ৱামিত্রান্ৱযাযাস্তু ৱেঙ্কটেশায মঙ্গলম্॥ **2** ॥

পিতা যস্যানন্তসূরিঃ পুণ্ডরীকাক্ষযজ্ৱনঃ।
পৌত্রো যস্তনযস্তোতারম্বাযাস্তস্য মঙ্গলম্॥ **3** ॥

ৱেঙ্কটেশাৱতারোঽযং তদ্ঘণ্টাংশোঽথৱা ভৱেৎ।
যতীন্দ্রাংশোঽথৱেত্যেৱং ৱিতর্ক্যাযাস্তু মঙ্গলম্॥ **4** ॥

শ্রীভাষ্যকারঃ পন্থানম্ আত্মনা দর্শিতং পুনঃ।
উদ্ধর্তুমাগতো নূনম্ ইত্যুক্তাযাস্তু মঙ্গলম্॥ **5** ॥

যো বাল্যে ৱরদার্যস্য প্রাচার্যস্য পরাং দযাম্।
অৱাপ্য ৱৃদ্ধিং গমিতঃ তস্মৈ যোগ্যায মঙ্গলম্॥ **6** ॥

রামানুজার্যাদাত্রেযাৎ মাতুলাৎ সকলাঃ কলাঃ।
অৱাপ ৱিংশত্যব্দে যঃ তস্মৈ প্রাজ্ঞায মঙ্গলম্॥ **7** ॥

শ্রুতপ্রকাশিকা ভূমৌ যেনাদৌ পরিরক্ষিতা।
প্রৱর্তিতা চ পাত্রেষু তস্মৈ শ্রেষ্ঠায মঙ্গলম্॥ **8**॥

সাংস্কৃতীভির্দ্রামিডীভিঃ বহ্ৱীভিঃ কৃতিভির্জনান্।
যস্সমুজ্জীৱযামাস তস্মৈ সেৱ্যায মঙ্গলম্॥ **9**॥

যঃ খ্যাতিলাভপূজাসু ৱিমুখো ৱৈষ্ণৱে জনে।
ক্রযণীযদশাং প্রাপ্তঃ তস্মৈ ভৱ্যায মঙ্গলম্॥ **10**॥

যস্মাদেৱ মযা সর্ৱং শাস্ত্রমগ্রাহি নান্যতঃ।
তস্মৈ ৱেঙ্কটনাথায মম নাথায মঙ্গলম্॥ **11**॥

পিত্রে ব্রহ্মোপদেষ্ট্রে মে গুরৱে দৈৱতায চ।
প্রাপ্যায প্রাপকাযাস্তু ৱেঙ্কটেশায মঙ্গলম্॥ **12**॥

যঃ কৃতং ৱরদার্যেণ ৱেদান্তাচার্যমঙ্গলম্।
আশাস্তেঽনুদিনং সোঽপি ভৱেন্মঙ্গলভাজনম্॥ **13**॥

## সপ্ততি রত্ন মালিকা

ভাদ্রপদমাসগতৱিষ্ণুৱিমলর্ক্ষে
    ৱেঙ্কটমহীধ্রপতিতীর্থদিনভূতে।
প্রাদুরভৱজ্জগতি দৈত্যরিপুঘণ্টা
    হন্ত কৱিতার্কিকমৃগেন্দ্রগুরুমূর্ত্যা॥

সশঙ্খচক্রলাঞ্ছনঃ সদূর্ধ্ৱপুণ্ড্রমণ্ডিতঃ
    সকণ্ঠলগ্নসত্তুলস্যনর্ঘপদ্মমালিকঃ।
সিতান্তরীযসূত্তরীয যজ্ঞসূত্রশোভিতঃ
    মমাৱিরস্তু মানসে গুরুঃ স ৱেঙ্কটেশ্ৱরঃ॥

অনন্তসূরিসূনৱেঽভিনন্দ্যমানৱৈভৱাদ্
    দিগন্তৱাদিহংসজৈত্রকালমেঘদেশিকাৎ।
উপাত্তসর্ৱশাসনায হন্ত ৱর্ষৱিংশতৌ
    পুনঃপুনর্নমস্ক্রিযাঽস্তু ৱেঙ্কটেশসূরযে॥

কৱিতার্কিককলভৱ্রজকবলীকৃতিসিংহং
    কমলাপতিকরুণারসপরিৱর্ধিতবোধম্।
যতিনাযকপদপঙ্কজযুগলীপরতন্ত্রং
    ভজ মানস বুধৱেঙ্কটপতিদেশিকমনিশম্॥

কলযে সততং করুণাজলধিং
    করুণাৱিষযং কমলাধিপতেঃ।
কলিৱৈরিশঠারিৱচোরসিকং
    কৱিতার্কিককেসরিসূরিগুরুম্॥

গুরৌ ৱাদিহংসাম্বুদাচার্যশিষ্যে
    জনা ভক্তিহীনা যতীন্দ্রাপ্রিযাঃ স্যুঃ।
যতীন্দ্রাপ্রিযা ৱিষ্ণুকারুণ্যদূরাঃ
    কুতো মুক্তিৱার্তা হি তাদৃগ্ৱিধানাম্॥

ৱেদে সঞ্জাতখেদে মুনিজনৱচনে প্রাপ্তনিত্যাৱমানে
    সঙ্কীর্ণে সর্ৱৱর্ণে সতি তদনুগুণে নিষ্প্রমাণে পুরাণে।
মাযাৱাদে সমোদে কলিকলুষৱশাচ্ছূন্যৱাদেঽৱিৱাদে
    ধর্মত্রাণায যোঽভূৎ স জযতি ভগৱান্ ৱিষ্ণুঘণ্টাৱতারঃ॥

॥ ইতি শ্রীদেশিকমঙ্গলম্ সমাপ্তম্॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥

ৱাদিদ্বিপশিরোভঙ্গপঞ্চাননপরাক্রমঃ।
শ্রীমান্ ৱেঙ্কটনাথার্যঃ চিরং ৱিজযতাং ভুৱি ॥